# श्रीस्तवावल्यां चैतन्याष्टकम्

Version 0.2

## रघुनाथदासगोस्वामिरचितम्

30 April 2000

हरिर्दृष्ट्वा गोष्ठे मुकुरगतमात्मानमतुलं
स्वमाधुर्यं राधाप्रियतरसखीवाप्तुमभितः ।
अहो गौडे जातः प्रभुरपरगौरैकतनुभाक्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥१ ॥

पुरीदेवस्यान्तःप्रणयमधुना स्नानमधुरो
मुहुर्गोविन्दोद्यद्विशदपरिचर्यार्चितपदः ।
स्वरूपस्य प्राणार्बुदकमलनीराजितमुखः
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥२ ॥

दधानः कौपीनं तदुपरि बहिर्वस्त्रमरुणं
प्रकाण्डो हेमाद्रिद्युतिभिरभितः सेविततनुः ।
मुदा गायन्नुच्चैर्निजमधुरनामालिमसौ
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥३ ॥

अनावेद्यां पूर्वैरपि मुनिगणैर्भक्तिनिपुणैः
श्रुतेर्गूढां प्रेमोज्ज्वलरसफलां भक्तिलतिकां ।
कृपालुस्तां गौडे प्रभुरतिकृपाभिः प्रकटयन्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥४ ॥

निजत्वे गौडीयान् जगति परिगृह्य प्रभुरिमान्
हरेकृष्णेत्येवं गणनविधिना कीर्तयत भोः ।
इतिप्रायां शिक्षां जनक इव तेभ्यः परिदिशन्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥५ ॥

पुरः पश्यन् नीलाचलपतिमुरुप्रेमनिवहैः
क्षरन्नेत्राम्भोभिः स्नपितः निजदीर्घोज्ज्वलतनुः ।
सदा तिष्ठन् देशे प्रणयिगरुडस्तम्भचरमे
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥६ ॥

मुदा दन्तैर्दष्ट्वा द्युतिविजितबन्धूकमधरं
करं कृत्वा वामं कटिनिहितमन्यं परिलसन् ।
समुत्थाप्य प्रेम्नागणितपुलको नृत्यकुतुकी

शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥ ७ ॥

सरित्तीरारामे विरहविधुरो गोकुलविधोर्
नदीमन्यां कुर्वन्नयनजलधाराविततिभिः ।
मुहुर्मूर्च्छां गच्छन्मृतकमिव विश्वं विरचयन्
शचीसूनुः किं मे नयनशरणीं यास्यति पुनः ॥ ८ ॥

शचीसूनोरस्याष्टकमिदमभीष्टं विरचयत्
सदा दैन्योद्रेकादतिविशदबुद्धिः पठति यः ।
प्रकामं चैतन्यः प्रभुरतिकृपावेशविवशः
पृथुप्रेमाम्भोदौ प्रथितरसदे मज्जयति तम् ॥ ९ ॥

इतिश्रीचैतन्याष्टकम्